इकञ् च नि० इति मल्लि०। २आशुविनाशिनि, आद्यन्तयोरभावात्, । आकालं व्याप्नोति ठञ्। ३पूर्व्वदिवसे यत्समये उत्पत्तिः परेद्युस्तत्समयपर्य्यन्तव्यापके काले "आकालिकमनध्यायमेतेष्विति" "एतानाकालिकान् विद्यादनध्यायानृतावपि" "आकालिकमनध्यायं विद्यात् सर्व्वाद्भुतेषु च" इति च मनुः। आशुविनाशित्वात् ४विद्युति स्त्री।

**आकाश** पुंन० समन्तादाकाशन्ते सूर्य्यादयोऽत्र। १खनामख्याते द्रव्यभेदे। स च न्यायादिमते नित्यः सर्व्वमूर्त्तसंयोगी शब्दमात्रविशेषगुणकः संख्यापरिमाणपृथक्त्वसंयोगविभागरूपसामान्यगुणकश्च। तत्सत्त्वे प्रमाणञ्च मुक्ता० दर्शितम् यथा "शब्दोविशेषगुणः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात्, स्पर्शवत्। शब्दोद्रव्यसमवेतः गुणत्वात् संयोगवत् इत्यनुमाने शब्दस्य द्रव्यसमवेतत्वे सिद्धे शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्व्वकप्रत्यक्षत्वात्, सुखवत्। पाकजरूपादौ व्यभिचारवारणाय सत्यन्तं, पटरूपादौ व्यभिचारवारणाय अकारणगुणपूर्व्वकेति, जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति। शब्दोन दिक्कालमनोगुणः विशेषगुणत्वात्, नात्मविशेषगुणः बहिरिन्द्रियग्राह्यत्वात् रूपवत् इत्थञ्च शब्दाधिकरणं नवमं द्रव्यं गगननामकं सिध्यतीति। न च वाय्ववयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्व्वकः शब्दउत्पद्यतामिति वाच्यम् अयावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावात्"। "व्याख्यातञ्च दिनक० "शब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात् इत्येवं रूपं बोध्यम्। दर्शितं सूचितम्। अत्रानुमाने स्वरूपासिद्धिं परिहर्त्तुमाह तथाहीति घटादौ व्यभिचारवारणाय चक्षुर्ग्रहणायोग्येति आत्मनि व्यभिचारवारणाय बहिरिन्द्रियग्राह्येति रसत्वादौ व्यभिचारवारणाय जातिमदिति एतच्चानुमानमग्रिमद्रव्यसमवेतत्वसाधकानुमाने स्वरूपासिद्धिनिरासायेति बोध्यम्। गुणत्वादिति एतदनुमानेनोक्तपरिशेषानुमानहेतौ विशेष्यासिद्धिर्निरस्ता। विशेषणासिद्ध्युद्धारमाह शब्दोन स्पर्शवद्विशेषगुण इति। न स्पर्शवतोद्रव्यस्य पृथिव्यादिचतुष्टयस्य विशेषगुण इत्यर्थः। अकारणगुणपूर्व्वकप्रत्यक्षत्वादिति अकारणगुणपूर्व्वकत्वे सति प्रत्यक्षत्वादित्यर्थः। हेतुसत्त्वं प्रतिपादयितुं पाकज इति। जलपरमाण्विति अनित्यानां पार्थिवरूपादीनां केषाञ्चिदग्निसंयोगासमवायिकारणत्वात् केषाञ्चित्कारणपूर्व्वकत्वादत्रोपेक्षा। न दिक्कालेति शब्द इत्यनुवर्त्तते बहिरिन्द्रियेति। मनसोऽन्यदिन्द्रियं बहिरिन्द्रियं तेन प्रत्यक्षत्वादित्यर्थः। एतेनानात्मगुणग्राहकेन्द्रियत्वं बाह्येन्द्रियत्वं तच्च मनस्यप्यतिप्रसक्तं तेनापि रूपादिग्रहणादिति निरस्तम्। इत्थञ्च अनेन प्रकारेण पृथिव्याद्यष्टद्रव्यानाश्रितत्वसिद्धौ च। सिद्ध्यतीति इति पूर्व्वोक्तपरिशेषानुमानेन सिद्ध्यतीत्यर्थः। नन्वेतत्सर्व्वं तदोपपद्येत यदि शब्दस्य विशेषगुणत्वे किञ्चित्प्रमाणं स्यात् तत्रैव च न मानं पश्याम इति चेत् न शब्दोविशेषगुणः लौकिकप्रत्यासत्त्येन्द्रियग्राह्यत्वे सति लौकिकप्रत्यासत्त्या द्वीन्द्रियग्रहणयोग्यताराहित्ये च सति गुणत्वव्याप्यजातिमत्त्वादित्यनुमानस्यैव तत्र प्रमाणत्वात् प्रभात्वमादाय व्यभिचारवारणाय गुणत्वव्याप्येति गुरुत्वत्वमादाय व्यभिचारवारणाय प्रथमं सत्यन्तं, संख्यात्वमादाय व्यभिचारवारणाय द्वितीयं सत्यन्तम्। सांसिद्धिकद्रवत्वस्नेहधर्माधर्मभावनासु प्रकृतहेतोरभावेऽपि तत्र हेत्वन्तरेणैव विशेषगुणत्वं साधनीयमिति भावः। पूर्व्वोक्तानुमाने बाधं स्वरूपासिद्धिं च आशङ्कते न चेति। वायाविति तथा च स्पर्शवद्वायुगुणत्वस्य तत्र सत्त्वात्तदभावसाधने बाध इति भावः। कारणगुणपूर्व्वकत्वकथनं तु अकारणगुणपूर्व्वकत्वघटितहेतोरसिद्धिप्रदर्शनार्थम्। अयावद्द्रव्यभावित्वेनेति स्वाश्रयनाशजन्यनाशप्रतियोगि यद्यत् तद्भिन्नत्वेनेत्यर्थः। ननु तथाप्याकाशे प्रत्यक्षमेव प्रमाणं किमिति नोपन्यस्तमिति चेन्न चाक्षुषत्वे प्रयोजकस्य महत्त्वे सत्युद्भूतरूपवत्त्वस्याकाशेऽसंभवेन चक्षुषः प्रमाणत्वासम्भवात्। ननु यदि आकाशे न चाक्षुषस्तदेह पक्षीति चाक्षुषेऽधिकरणत्वेन किं भासत इति चेदालोक एवेति कल्प्यम्"। "निष्क्रमणप्रवेशनाद्युत्क्षेपणधर्म्मवत्त्वादाकाशसिद्धिरिति सांख्यादयोमन्यन्ते" सांख्यमताभिप्रायेणैव सुश्रुते। "आन्तरीक्षास्तु शब्दः शब्देन्द्रियं सर्व्वच्छिद्रसमूहो विविक्तता चेत्युक्तम्"। "शब्दःश्रोत्रेन्द्रियञ्चापि छिद्राणि च विविक्तता। वियतोदर्शिता एते गुणा गुणविचारिभिरिति" च वेदान्तिभिरुक्तमिति वेदितव्यम्। तदेतन्मतं वै०सूत्रे निराकृतम् यथा "निष्क्रमणं प्रवेशनमित्याकाशस्य लिङ्गम्२०। तदलिङ्गमेकद्रव्यत्वात् कर्म्मणः२१। कारणान्तरानुक्लृप्तिवैधर्म्याच्च२२। संयोगादभावः कर्म्मणः२३। कारणगुणपूर्व्वकः कार्य्यगुणो दृष्टः२४। कार्य्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः२५ परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुणः२६।